9. Hafta

# ९

अयं कः? स बालकः। अस्य नाम किम्? तस्य नाम कृष्णः इति।

स किं करोति? स लिखति। स भ्रात्रे पत्रिकां लिखति।

त्वं किं लिखसि? अहं संस्कृतप्रतिलेखं लिखामि।

प्रतिलेखनेन अक्षराणि सुन्दराणि भवन्ति।

तव नाम किम्? मम नाम राघवः इति। राघव! त्वं कस्मात् न लिखसि?

आर्य मम लेखनी नास्ति। लेखन्या विना कथं लिखामि? भद्र!

त्वं प्रतिदिनं लेखन्या पुस्तकेन च विना पाठालयम् आगच्छसि।

मा एवं कुरु। आर्य! अहं कृष्णेन सह गृहं गत्वा लेखनीम् आनयामि।

तथा कुरु।